# अथ लिङ्गानुशासनम् ।

१ लिङ्गम् । २ स्त्री । ३ ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः । ४ अन्यूप्रत्ययान्तो धातुः । ५ अशनिभरण्यरणयः पुंसि च । ६ मिन्यन्तः । ७ वह्निवृष्ण्यग्नयः पुंसि । ८ श्रोणियोन्यूर्मयः पुंसि च । ९ क्तिन्नन्तः । १० ईकारान्तश्च । ११ ऊङ्याबन्तश्च । १२ य्वन्तमेकाक्षरम् । १३ विंशत्यादिरानवतेः । १४ दुन्दुभिरक्षेषु । १५ नाभिरक्षत्रिये । १६ उभावन्यत्र पुंसि । १७ तलन्तः । १८ भूमिविद्युत्सरिल्लतावनिताभिधानानि । १९ यादो नपुंसकम् । २० भास्स्रुक्स्रग्दिग्दृगुष्णिगुपानहः । २१ स्थूणोर्णे नपुंसके च । २२ गृहशशाभ्यां क्लीबे । २३ प्रावृड्विप्रुड्रुट्तृड्विट्त्विषः । २४ दर्विविदिवेदिखनिखान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः । २५ तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः । २६ शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपङ्क्तयः । २७ प्रतिपदापद्विपत्संपच्छत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः । २८ आशीर्धूःपूर्गीर्द्वारः । २९ अप्सुमनस्समासिकतावर्षाणां बहुत्वं च ३० स्रक्त्वग्ज्योग्वाग्यवागूनौस्फिचः । ३१ तृटिसीमासंबध्याः । ३२ चुल्लिवेणिखार्यश्च । ३३ ताराधाराज्योत्स्नादयश्च । ३४ शलाका स्त्रियां नित्यम् ॥

१ पुमान् । २ घञबन्तः । ३ घाजन्तश्च । भयलिङ्गभगपदानि नपुंसके । ५ नङन्तः । ६ याच्ञा स्त्रियाम् । ७ क्यन्तो घुः । ८ इषुधिः स्त्री च । ९ देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि । त्रिविष्टपत्रिभुवने नपुंसके । ११ द्यौः स्त्रियाम् । १२ इषुबाहू स्त्रियां च । १३ बाणकाण्डौ नपुंसके च । १४ नान्तः । १५ क्रतुपुरुषकपोलगुल्फमेघाभिधानानि । १६ अभ्रं नपुंसकम् । १७ उकारान्तः । १८ धेनुरज्जुकुहूसरयूतनुरेणुप्रियङ्गवः स्त्रियाम् । १९ समासे रज्जुः पुंसि च । २० श्मश्रुजानुस्वाद्वश्रुजतुत्रपुताल्वनि नपुंसके । २१ वसु चार्थवाचि । २२ मद्गुमधुशीधुसानुकमण्डलूनि नपुंसके च । २३ रुत्वन्तः । २४ दारुकसेरुजतुवस्तुमस्तूनि नपुंसके । २५ सक्तुर्नपुंसके च । २६ प्राग्रश्मेरकारान्तः । २७ कोपधः । २८ चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके । २९ कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलककल्कपुलाकानि नपुंसके च । ३० टोपधः । ३१ किरीटमुकुटललाटवटवीटश्रृङ्गाटकरटलोष्टानि नपुंसके । ३२ कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च । ३३ णोपधः । ३४ ऋणलवणपर्णतोरणरणोष्णानि नपुंसके । ३५ कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च । ३६ थोपधः । ३७ काष्ठपृष्ठसिक्थोक्थानि नपुंसके । ३८ काष्ठा दिगर्था स्त्रियाम् । ३९ तीर्थप्रोथयूथगूथानि नपुंसके च । ४० नोपधः । ४१ जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके । ४२ मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दना-

लानसमानभवनवसनसंभावनविभावनविमानानि नपुंसके च । ४३ पोपधः । ४४ पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके । ४५ शूर्पकुतपकुणपद्विपविटपानि नपुंसके च । ४६ भोपधः । ४७ तलभं नपुंसकम् । ४८ जम्भं नपुंसके च । ४९ मोपधः । ५० रुक्मसिध्मयुध्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके । ५१ सङ्ग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च । ५२ योपधः । ५३ किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके । ५४ गोमयकषायमलयान्वयाव्ययानि नपुंसके च । ५५ रोपधः । ५६ द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रच्छिद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदरशरीरकन्दरमन्दरपञ्जराजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्रच्छत्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रास्त्रशस्त्रशास्त्रवस्त्रपत्रपात्रनक्षत्राणि नपुंसके । ५७ शुक्रमदेवतायाम् । ५८ चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च । ५९ षोपधः । ६० शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके । ६१ यूषकरीषमिषविषवर्षाणि नपुंसके च । ६२ सोपधः । ६३ पानसबिसबुससाहसानि नपुंसके । ६४ चमसांसरसनिर्यासोपवासकार्पासवासमासकासकांसमांसानि नपुंसके च । ६५ कंसं चाप्राणिनि । ६६ रश्मिदिवसाभिधानानि । ६७ दीधितिः स्त्रियाम् । ६८ दिनाहनी नपुंसके । ६९ मानाभिधानानि । ७० द्रोणाढकौ नपुंसके च । ७१ खारीमानिके स्त्रियाम् । ७२ दाराक्षतलाजासूनां बहुत्वं च । ७३ नाड्यापजनोपपदानि व्रणाङ्गपदानि । ७४ मरुद्गरुत्तरद्दत्विजः । ७५ ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौरविकविकपिसुनयः । ७६ ध्वजगजमुञ्जपुञ्जाः । ७७ हस्तकुन्तान्तवातव्रातदूतधूर्तसूतचूतमुहूर्ताः । ७८ षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः । ७९ वंशांशपुरोडाशाः । ८० ह्रदकन्दकुन्दबुद्बुदशब्दाः । ८१ अर्धपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः । ८२ पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धस्कन्धमृदङ्गसङ्गसमुद्रपुङ्खाः । ८३ सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः ।

१ नपुंसकम् । २ भावे ल्युडन्तः । ३ निष्ठा च । ४ त्वष्यञौ तद्धितौ । ५ कर्मणि च ब्राह्मणादिगुणवचनेभ्यः । ६ यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि । ७ अव्ययीभावः । ८ द्वन्द्वैकत्वम् । ९ अभाषायां हेमन्तशिशिरावहोरात्रे च । १० अनञ्कर्मधारयस्तत्पुरुषः । ११ अनल्पे छाया । १२ राजामनुष्यपूर्वा सभा । १३ सुरासेनाच्छायाशालानिशाः स्त्रियां च । १४ शिष्टः परवत् । १५ रात्राह्नाहाः पुंसि । १६ अपथपुण्याहे नपुंसके । १७ संख्यापूर्वा रात्रिः । १८ द्विगुः स्त्रियां च । १९ इसुसन्तः । २० अर्चिः स्त्रियां च । २१ छदिः स्त्रियामेव । २२ मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि । २३ सीरार्थौदनाः पुंसि । २४ वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च । २५ अटवी स्त्रियाम् । २६ लोपधः । २७ तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि । २८ शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालनिगलपलालबिडालखिलशूलाः पुंसि च । २९ शतादिः

**संख्या । ३० शतायुतप्रयुताः पुंसि च । ३१ लक्षाकोटी स्त्रियाम् । ३२ शङ्कुः पुंसि । ३३ सहस्रः क्वचित् । ३४ मन्द्यच्कोऽकर्तरि । ३५ ब्रह्मन्पुंसि च । ३६ नामरोमणी नपुंसके ।** ३७ असन्तो द्व्यच्कः । ३८ अप्सराः स्त्रियाम् । ३९ त्रान्तः । ४० यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव । ४१ भृत्रामित्रच्छात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि । ४२ पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च । ४३ बलकुसुमशुल्बपत्तनरणाभिधानानि । ४४ पद्मकमलोत्पलानि पुंसि च । ४५ आहवसङ्ग्रामौ पुंसि । ४६ आजिः स्त्रियामेव । ४७ फलजातिः । ४८ वृक्षजातिः स्त्रियामेव । ४९ वियज्जगत्सकृच्छकन्पृषच्छकृद्यकृदुदश्वितः । ५० नवनीतावतानानृतामृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि । ५१ श्राद्धकुलिशदैवपिठरकुण्डाङ्काङ्गदधिसक्थ्यक्ष्यस्थ्यास्पदाकाशकण्वबीजानि । ५२ दैवं पुंसि च । ५३ धान्याज्यसस्यरूप्यपण्यवर्ण्यधिष्ण्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि । ५४ द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचकबरवृन्दारकाणि । ५५ अक्षमिन्द्रिये ॥

१ स्त्रीपुंसयोः । २ गोमणियष्टिमुष्टिपाटलिबस्तिशाल्मलित्रुटिमसिमरीचयः । ३ मन्युसीधुकर्कन्धुकसिन्धुपण्डुरेणवः । ४ गुणवचनमुकारान्तं नपुंसकं च । ५ अपत्यार्थस्तद्धिते ॥

१ पुंनपुंसकयोः । २ घृतभूतमुस्तक्ष्वेलितैरावतपुस्तबुस्तलोहिताः । ३ शृङ्गार्धनिदाघोद्यमशल्यादृढाः । ४ व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चपुच्छाः । ५ कबन्धौषधायुधान्ताः । ६ दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः । ७ गृहमेहदेहपट्टपटहाष्टापदार्बुदककुदाश्च ॥

१ अवशिष्टलिङ्गम् । २ अव्ययम् । ३ कतियुष्मदस्मदः । ४ ष्णान्ता संख्या । ५ गुणवचनं च । कृत्याश्च । ७ करणाधिकरणयोर्ल्युट् । ८ सर्वादीनि सर्वनामानि ॥

**॥ इति श्रीपाणिनिमुनिप्रणीतं लिङ्गानुशासनं समाप्तम् ॥**